Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७३३

Title राज्याभिषेक प्रयोगः

Author सम्राट्स्थपति रघुनाथः माधवभट्टात्मजः

Extent १५ पत्राणि Age शके १६८१

Subject धर्मशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभिषेकप्रयोगः

४७३३

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा कृष्णतायधरणीधवनावलीनाकीर्त्तिर्दिशोदशाविदधत्यप्रतिबन्नैव॥ यत्रीयतेनादेदर्के [illegible] मंत्र [illegible] नमु
यान्निकदापि नचत्स्वतापः॥ १॥ पालयन्नपि नधनं नोधर्मो यां नकश्चिदपिपूर्वजोऽभ्यगात्॥ २॥ नाम्नु [illegible] तया
त्रतापत्र नायकेनसमस्यापि [illegible] नाथ॥ ३॥ सा विना [illegible] विधिनानभ्रोमतेभङ्गेन नराधितवकामिना॥ [illegible]
कृतिभवि [illegible] दितस्तोसमास विधिनाशिवदमैके॥ ४॥ नारायणस्य॥ विश्वं नरसरत्वं [illegible] वदि [illegible]
[illegible] येत्तद्व्यासावे यज्ञाविष्कौं नरानिर्धार्या॥ ५॥

विद्वद्धर्मोन्नरोत्रकल्येन

राज्यावित्रिविवेकप्रयोगः

या विश्वाला [illegible] सुतया सर्वलोकीजो [illegible]

[illegible] विनोने

पुस्तकं [illegible] रामचन्द्र [illegible]

पत्रानि पंचदश १५

॥ ८७॥ [illegible]

~~[illegible]~~

~~[illegible]~~

© Dharmartha Trust J&K. Digitized by eGangotri

राऽपा ॥१॥

ॐ॥ श्रीमहागणपतये नमः॥ अथ विष्णुधर्मोत्तरोक्तकल्पेन राज्याभिषेकप्रयोगः॥ तत्र
यदा तावत्पूर्वस्मिन्मृते तदुत्तरस्य अभिषेकः क्रियते तदा स्नानविधिना तिलसर्षपै
स्यादेतस्य पं संवत्सरपुरोहितौ हुत्वा राष्ट्रे घोषयेदिदानीं राजेति तस्य जयघोषं घोषये
त्वा पूर्वराजासनादन्यासनोपविष्टस्य तस्य मुख्यं मंत्र्यादिकं नागरिकं च जनं दर्शये
त्॥ ततो राज्ञा नं स्वीयजनं यथोचितं सत्कृत्य संतोषयित्वा कारागृहनिगडबद्धान्मु
क्त्वा सर्वास्मिन्नपि राष्ट्रे अभयं घोषयित्वा तदा स नगरत एव प्रजाः परिपालयन्नभिषे
ककालं प्रतीक्षमाणोऽतिष्ठेत्॥ ततः अभिषेककाले वक्ष्यमाणविधिना आत्मानमभिषे
चयेत्॥ अभिषेककालश्च विष्णुधर्मोत्तरोक्तज्योतिःशास्त्राद्विज्ञेयः। यदा तु पूर्वस्मि ॥श्रीः॥
न्राज्ञि जीवत्येव केनचित्कारणादुत्तरस्याभिषेकस्तदा कालं प्रतीक्षेत मत्वा ॥१॥
अभिषेककाले अभिषेक एव कार्यः। अभिषेकदिनात्पूर्वमेव समीचीने कस्मिंश्चिद्दिने

लेख्यराज्ञास्थितश्चैव नानुलेपनमाल्यसर्वाभरणभूषितो वह्नेर्दक्षिणपार्श्वे आसने स्थि-
त्वा अन्यैश्च सामन्तादिभिः राज्ञा नित्यं संवत्सरेण न्यदेवज्ञैर्मुख्यसदस्यैर्नान्यै
श्च सदस्यैः पुरोहितैश्च सहितो होमवह्नेर्निमित्तानि पश्येत्तु। तानि च विष्णुधर्मोत्तरे
प्रदक्षिणावर्तशिखस्तप्तजांबूनदप्रदः। रथौघमेघनिर्घोषो विधूमश्च हुताशनः
अनुलोमः सुगंधश्च स्वस्तिकाकारसंनिभः। वर्धमानाकृतिश्चैव नंद्यावर्तनिभस्तथा।
प्रसन्नार्चिर्महाज्वालस्फुलिंगरहितो हितः। स्वाहावसाने ज्वलनः स्वयं देवमुख
हविः। यदा भुंक्ते महाभाग तदा राज्ञो हितं वदेत्। हविर्विघ्नश्च यदा वह्नेर्न स्यात्। क्षिति मि भ्रि
मापितं नवजे पुष्पमध्ये नमोऽजीरमगपार्थिवः। पिपीलिकाश्च यन्नेतत्तदा विघ्नाश्च कीर्ति-
न्ये। अंगनाप्रादक्षिण्येनैव वह्नेराहो जयं वदेत्। तथैव च जयं ब्रूयात् यस्तस्य स्याद्यदा हितानि। स्व-
स्तिकवर्धमाननंद्यावर्ताराजग्रहप्रसेदाः देवस्तु रवौ ज्वलनं इत्यर्वा। मध्ये न होतुर न्नैश्च
तता पुरोहितः प्रयातनवोमं परस्मिन्नायाथर्वणोक्तप्रकारेणोगतस्को पश्यतात्पूर्वमुक्तानां

प:२

© Dharmartha Trust J&K. Digitized by eGangotri

रास्प
॥३॥
3

कृत्वा सज्ञासनात् त्रिर्दिक्षु आसनस्य प्रमादो दोषेण च्छयः स्तुंगं स्थलेनोद्धर्त्तनादिभिः स्नातुं राज्ञां नंस्ना
नशालायां क्रमशः ऐर्मृत्तिकाभिः स्नपयेत् ॥ तद्यथा ॥ पर्वताग्रादिमृदः सुमा पैस्या घट्टि
त्वा वल्लिरुद्धा पर्वताना मितित्यैकमसिमं व्यमावो रिषत्तवनितेति त्वैकं स्वनित्वास्या
नां पृथिवीत्येकैकां गृहीत्वा एकैकमंगंयाज्ञात्वा सिलैः पयेत् ॥ तत्र पर्वताग्रमृदासहस्त्र
शीर्षेतिमूर्द्धानं वल्मीकाग्रमृदा अग्नी स्यात इतिमन्त्रं पठित्वा कर्णौ ॥ विष्णुस्थलग्रमृदा ते
नैव मुखं ॥ इन्द्रस्थानमृदा ग्रीवा स्यस्त इति ग्रीवां ॥ राज्ञां गणमृदा अंगे स्यस्त इति हृद
यं ॥ करिदन्तोद्धृतमृदा चक्रमुखासकृत् पठित्वैव यस्यां विश्वानीति मन्त्रेणादक्षिणावामभु
जद्वयं ॥ सरोमृदावल्कीनां पितेति पृष्ठं ॥ संगममृदानां सानाभिं इति उदरं ॥ नदीकूलग्र
मृदा अतेसिंचामीत्यनाहृत्येनैव पार्श्वयोः ॥ वेश्याद्वारमृदा सोमानं स्वरणामिति कट्योः ॥
गजस्थानमृदा ऊरुस्यातइतितथैवोर्वोः ॥ गोष्ठमृदा मिहनाद्द्न मितितथैव जानुनोः ॥ अ ॥ अ
श्वस्थानमृदा तेनैव तथैव जंघयोः ॥ रथचक्रोद्धृतमृदा एतावनस्येति पादयोः ॥ सर्वास्विमं ॥ ३ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

दंगादिति सर्वांगेषु ततो गायत्र्या गंधद्वारेति आप्यायस्वेति दधिक्राव्णोति तेजोसि शुक्रम
ति आपो हि ष्ठेति च मंत्रैः आद्यैः पंचगव्यं पूर्वस्थापितं कलशमादाय एतैरेव मंत्रैः राज्ञा
नमभिषिंचेत्पुरोहितः । एवं कृत्वा सर्वांगि समीपं गच्छेत् । ततस्तदासनं त्यक्त्वान्यस्मिन्नास
नोपविष्टं राजानं तेजोसि शुक्रमिति घृतपूरितेन पूर्वस्थापितेन हेमकुंभेन ब्राह्मणा
मात्यः पूर्वतः स्थित्वाभिषिंचेत्तेनैव मंत्रेण । आप्यायस्वेति क्षीरपूरितेन पूर्वस्थापि
तेन रजतकुंभेन क्षत्रियामात्यो दक्षिणतः स्थित्वा तेनैवाभिषिंचेत् । दधिक्राव्णोति द
धिपूरितेन ताम्रकुंभेन पूर्वस्थापितेन वैश्यामात्यः पश्चिमतः स्थित्वा तेनैवाभिषिंचेत् ।
मधुवाता इति त्र्यचेन मधुपूरितेन मार्त्तिकेन कुंभेन शूद्रामात्यः उत्तरतः स्थित्वा तेनै
वाभिषिंचेत् । स एव तत्रैव वास्यतो देवस्य त्वेति कुशोदकपूरितेनान्यकुंभेन पूर्वस्था
पितेन तेनैव मंत्रेणाभिषिंचेत् । तत अपूरणो पूरयामीति आभिषेकेयावत्सूर्पिश्यामीति
वाक्यप्रघोषः । ततः पुरोहितः सदस्येषु अग्निः रक्षणीयस्त्युक्त्वा सुवर्णकलशं सेय

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभि
॥४॥

तवंतमादायराजस्नमीपंगत्वाभ्रालेणस्वस्तुकैः राजस्स्यगतराजाभिषेकमंत्रैरभिषि
ञ्चेत्। तेयथा। सोमस्यत्वाद्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसासूर्यस्यवर्चसेंद्रस्येंद्रियेण
क्षत्राणां क्षत्रपतिरेध्यतिदिद्यून्पाहि। इमंदेवा असपत्नंसुवध्वंमहतेज्यैष्ठ्यायमहते
जानराज्यायेंद्रस्येंद्रियायइममनुष्यपुत्रममुष्यैपुत्रमस्यैविशएषवोमीराजासो
मोस्माकंब्राह्मणानांराजेतियजुषा। इममित्यस्यस्थानेद्वितीयांतंराजनाम
अमुष्येत्यस्यस्थानेषष्ठ्यंतंतत्पितृनाम। अमुष्या इत्यस्यस्थानेषष्ठ्यंतंतन्मातृना
मवौ आरणीयं। आपोर्वदिकास्तु। इमा आपः। शिवतमा इत्यर्यं तृचः। देवस्यत्वासवि
तुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणा
भिषिंचामिबलायश्रियेयशसेन्नाद्यायेतियजुः। स्रुर्णुवास्यरितिव्याहृतेयज्ञाते। ॥श्री॥
वमन्येपितराच्छाखीयामंत्राजप्याः। ततः पुरोहितस्तदेववह्निस्थानंवेदिम् ॥४॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्नं गृहे त्वाततः शुगंधुद्वर्त्तीनद्रव्येणोद्वर्त्तितांगं नद्रास नगतमेव राजानं शातकुंभेनासौ
वर्णकलशेन वेदधर्मशास्त्राभिज्ञो न्योब्राह्मणः या ओषधीरिति मंत्रेण। पिष्टसर्वौ
षध्युदकेन रथेतिष्ठन्निति यजुषा गंधोदकेन आब्रह्मन्ब्राह्मणेति यजुषा ब्रा वादि
बीजोदकेन पुष्पवतीरित्याथर्वणमंत्रेण तत्कालसंभविपुष्पोदकेन तेनैव मंत्रेण
तत्कालसंभविफलोदकेन आशुः शिशानइति सूक्तेन सर्वरत्नोदकेन। सिंचिष्ये
देवाः शुभाः सदमितिमंत्रेण कुशाद्यर्चिषि वृ पल्लवैः सोदकै राजांगानि परिमार्जयेत्।
ततोऽन्यः ऋग्वेदविद्ब्राह्मणो गोरोचनापिष्टेन गंधद्वारेति मंत्रेण राज्ञो मूर्द्धानं कंठं च सं
स्पृशेत्। ततो मुख्यस्तु ताब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्वतादयश्च यथा सं
वृत्तुः स्त्रतुः नानातीर्थनदीसरः कूपोद्भूतैर्गंगायमुनानानापर्वतनिर्झरोद्भूतैः स्त
नैर्ब्राह्मणकोऽन्यैस्तैर्यथादिशं तास्थौः पूर्वस्यापितकलशगतैर्जलैर्मंत्रविदः स्वस्वशाखो
गतै राजाभिषेकमंत्रैरन्यैस्तु स्वस्वमेव राजानमभिषिंचेयुः। तत्कालेवामान्यस्तु रम्याः छत्र

© Dharmartha Trust J&K. Digitized by eGangotri

राज्या ॥५॥

याजयेच्चादीनुद्धारयेयुः। वेदिं तन्मध्यस्थां तिं कुर्युर्विप्राश्च मन्त्रघोषं वादकाश्च शंखवल्लेयोर्दि
वाद्यानि वादयेयुः। ततः सांवत्सरः सकलकलशान्तःस्थापितं पूर्वोक्तं सौवर्णं कु
लशमादाय तेनाग्रहीतेन कुम्भवारिणा विष्णुधर्मोत्तरोक्तैः सुरास्त्वामभिषिंचं
त्वित्यादिभिः संधैर्मन्त्रैर्बुद्धिरतीवस्वस्तिव्यैतैरथात्युत्तरश्लोकरूपैर्मन्त्रैर्वा विधिनो
क्तैः कलशैः प्रतिपादकैः कलशाद्विजा दिग्लोकरूपैर्मन्त्रवाक्यैस्तं नृपं रुद्रश्रीकुर्वन्न
भिषिंचेत्। तत्र श्लोकाः। प्रयोगांते वक्ष्यंते। सर्वैर्मन्त्रैस्तैश्चतुष्कलशैर्नैव राज्ञो मूर्द्धि
जलं क्षिपेत्। ततः सुगंधिपुष्पोदकस्नातो राजा सितोष्णीषवस्त्रो धृत्वा वाद्यैर्वे
स्त्रमुखं दृष्ट्वा श्रुत्वा विलीनाज्यैः तत्पात्रं विप्राय प्रतिपाद्य वेदं नत्वा गुरुमंग
लद्रव्याणि संनिकृत्वा महाविष्णुं यथाविधि नवं राज्ञो यथारीत्यर्च्य विप्रांश्च चरं वेद ॥२॥
विद्यां तीर्थं च स्नात्वालंकारादि नित्यं सांवत्सरपुरोहितो तु मधुपर्केणाभिके
नार्हयेत्। ततो देवज्ञो राज्ञो ललाटे पट्टं बध्नीयात् पट्टबन्धकालेन ॥२

मध्य एवं लक्षणको भवति। अष्टांगुलः पंचदशांगुलो वा विंशत्यंगुल एको नत्रिंशदंगुलः
षड्त्रिंशदंगुलो वा दैर्घ्ये। दैर्घ्यार्धेन मध्यदेशा विस्तृतः दैर्घ्यचतुर्थांशेन अग्रे न द्वया विस्तृतः द्वात्रायतश्च
तुरस्त्रायतो वा श्रीवत्सेनेश्वरेण वृषदेन गजमुख वृषगज रूपेण वराहदेन गजमुख वराहगजरू
पेण पद्मनस्य स्वस्तिक विनायक लक्ष्मी विष्णु स्कंद पार्वती प्रतिमादि निरन्या सिध्यनु
भवस्य प्रतिमा निरन्चितो मध्यदेशोपपन्नयो भूमिपतेः पंचशिखो युवराज महिष्यास्त्रि
शिखः सेनापतेश्चैकशिख इति। एवंरूप पट्ट मुकुटो राजा शुभे काले क्रमेणाद्ध [illegible] दंशान्
पिसिंहव्या प्रथमास्तृत वज्र मूल्य वस्त्रा नमणोत्तरच्छदं दत्ता दिलेनेन मे मंत्रे ध्रुवाद्यौ रिति मंत्रे
ण पुरोहितेन नृपवेश्मानीयः। ततस्तत्रोपविष्टाय राज्ञे प्रतीहारेण अमात्या पौर मुख्या नन्यदेशा
गता न च देशास्थितांश्च वणिजः प्रकृतीश्च यथाक्रमं दर्शयित्वा। ततो राजा अश्वहारवस्त्र राजाश्व
गोग्रामादिकनकादिदानेन अभिषेकविनियुक्तो सांवत्सर पुरोहितौ पूजयित्वा तावद्दशानेवकर गवे
दवित्रस्तीस्त्रीन्त्रां त्रयाणां च यथाविभवं सुवर्णविस्त्रादिभिः पूजयित्वा अन्यांश्च सांवत्सरपु

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभि
॥ ६ ॥
6

रोहितान्आलेपनसुरभींश्च श्वेतचंदनपुष्पादिभिः पूजयित्वा अन्नमोदकगोरसादिभिः संतर्प्य गो
वस्त्रतिलरूप्यफलकांचनमहीदानैः संतोष्य चंदनकुंकुमगोरोचनादिमंगलद्रव्यैः स्वदक्षिणे
नं विधाय सप्तधारं घृतधारां दत्वा अग्निं प्रदक्षिणीकृत्य गुरून्नमस्कृत्य श्रेष्ठवृषभं सवत्सां गां च
दृष्ट्वा तत आलयस्य चोपवेशः । सलिलपूर्णमभ्यंगं जंबाधिकृतैस्तत्रानाययेत् । ततो देववित्सर्वौषधि
युतकलशोदकेन या ओषधीरिति मंत्रेणाभ्यषिंचेत् । दिव्यसुगंधिगंधमाल्यकौशेयपटवंधादिभि
स्तौ पूजयित्वा दत्वा पयो ... तं राज्ञः पुरत आनीय । जयाश्च त्वं मया राज्ञस्त्वं संग्रामे प्रतिष्ठितः । स्मरा
घटस्य ... पुत्रस्त्वं गंधर्वस्य त्वं तथा । स्मर । यथा नृणामयं राजा तथा त्वं सर्ववाजिनां । यथा सर्वं तं नृप
तिर्नित्यमेवारुरुक्षति । तथा त्वं रणे राजानं सर्वावस्थागतं कुरु । दर्शयाश्व तथात्मानं देवदोष
मुपागतं । रंगान्सकलान्रक्ष त्वयि नारायणमर्पितः । अथ प्रसन्नतिर्राजा वामकर्णेऽस्येति साक्षि
तः । अस्य वंशीयिष्यति सदा गंधमाल्यानुलेपनैः । द्विजनेभ्यो द्विजातीनां तथा चास्वासैव वायुनेष्टरः ॥ श्रीः ॥
क्षतु त्वां महेन्द्रस्तु पूर्वेण वित्तेशाधिपः । दक्षिणे नयमो देवः पश्चिमेन जलाधिपः । उदग्वै श्रवणो ॥ ६ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

देवाः सर्वे स्तं तु सर्वेनागाः गत्य स्थशांतिजकरणे कें मेंत्रैर्द दिणकोतमस्तिमं चैयेत्॥ ततो राजा नम
धिरुह्य किय त्कालं गतागतेन तत्रास्थित्वा ततोऽवरोहेत्॥ ततो देववित् देवस्नानौषधसर्वगंधसर्व
बीजसर्वरत्नयुतेन कलशागतसर्वतीर्थजलेन राज्ञाभिषेको कार्यः सर्वगंधादिमंत्रैः ब्रूवाणो नीतेन ग
जराजमानिषिच्य चंदनपुष्पनवस्त्रमाला हेमालंकारघंटाः छत्रवस्त्रादिभिस्तथा पूजयित्वा अ
स्ती तोषितमकुथास्तनं तं राज्ञा परतः आनीय स्वयं तमारुह्य श्रीगजस्त्वं कृतो राज्ञा भवतस्य ग
जायणीः गंधमाल्या न मम देवो स्वांह जायिष्यति पार्थिवः। तौ कष्टसदा स्तयं पूजां करिष्यति यथा त
वा पालनीयः स्मया राजा युद्धेऽध्वानि तथा गृहे। तिर्यग्लावं समनुस्मर इत्यादिमंत्रावमंत्रु स्मर।
देवासुरेषु युद्धेषु श्रीगजस्त्विद शोभनः। ऐरावणसुतः श्रीमानरिष्टो नाम वारणः। श्रीगजा
नां तु यत्तेजः सर्वमेवोपतिष्ठतु। तत्तेजस्त्वं नागेंद्र दिव्यनावसमन्वितं उपतिष्ठतु सर्वतो रक्ष
राज्ञा नमस्कृत्य वैद्यानि गजशांतिप्रकैर्मंत्रैर्दक्षिणाकर्णेन मानेनमंत्रं तं ततोऽवरोहेत्॥ ततो राजा तेन ना
गमारुह्य नत्वास्थित एव नानोत्तमगजारूढैर्मुख्यामात्यसामंतसांवत्सरपुरोहितादिभिः

© Dharmartha Trust J&K. Digitized by eGangotri

सहितो राजमार्गेण स्वपुरं परिभ्रम्य तत्र तद्देवायतनानि गत्वा यथाविभवं तास्तां देवतां नौ
ति नंकृत्वा ता दृष्ट्वा स्वगृहमागत्य गजादवतीर्य गजावतीर्णमुख्यामात्यादिसहितो नृपः गृहं प्र
विश्य यथोचितदानमानसत्कारपूजया सर्वेषां हर्षं दानेन सर्वान्नवशीकृत्य यथाविभ
वं कोटिलक्षादिसंख्येभ्यो ब्राह्मणेभ्यो भोजनं दत्त्वा संकल्प्य वा ब्राह्मणादीनां नाथेभ्यो
यथाविभवं हिरिद्दक्षिणां दत्त्वा सर्वान्विसृज्य स्वगृहे बंधुभिरन्यैश्च सार्धमतिमुदितो
भुंजीतेति ॥ एवं कुर्वतः फलमुक्तं विष्णुधर्मोत्तरे ॥ विधानमेतत्समवाप्य राजा कृत्स्नां
धरित्रीं वशगां विदध्यात् इति ॥ इति राज्याभिषेकप्रयोगः ॥ ॥ सुरास्त्वामभिषिंचं
तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानि
रुद्धश्च भवंतु विजयाय ते । आखंडलोऽग्निर्भगवान्यमो वै निरृतिस्तथा ॥ वरुणः पव
नश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः शेषो दिक्पालाः पांतु ते सदा ॥३॥ रुद्रो ध ॥श्री॥
र्मो मनुर्दक्षो रुचिः श्रद्धा तु पार्थिवाः भृगुरत्रिर्वसिष्ठश्च सनकश्च सनंदनः ॥४॥ सनत्कुमा ॥७॥

7

© Dharmartha Trust J&K. Digitized by eGangotri

रश्चैव तथा भगवानपि चांगिराः ॥ पुलहश्च पुलस्त्यश्च मरीचिः कश्यपः क्रतुः ॥५॥ एते त्वामभिषिं
चन्तु प्रजाध्यक्षाः समागताः ॥ प्रसाकरावर्हिषदो अग्निष्वात्तास्तथैव च ॥६॥ क्रव्यादाश्चोप
हूताश्च आज्यपाश्च सुकालिनः ॥ एते त्वामभिषिंचन्तु पितरश्चाग्निभिः सह ॥७॥ लक्ष्मीर्वेदीश
चीख्यातिरनसूया तथाऽरुन्धती ॥ संहृतिः संनतिश्चैव दमा शान्तिस्तथैव च ॥८॥ स्वाहा स्वधा च धा
त्री राजन्त्वाऽभिषिंचन्तु मातरश्च ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिर्लक्ष्मीस्तथा क्रिया ॥९॥ बुद्धिर्लज्जा
वपुः शान्तिस्तुष्टिः सिद्धिश्च पार्थिव । एतास्त्वामभिषिंचन्तु धर्मपत्न्यः समागताः ॥१०॥ अरुन्धती
वसुर्यामी लंबा भानुर्मरुत्वती ॥ संकल्पा च मुहूर्ता च साध्या विश्वा तथैव च ॥११॥ धर्मपत्न्यो दश
न्यास्त्वामभिषिंचन्तु पार्थिव । अदितिर्दितिर्दनुः कालानुहष्टा नायुषा मुनिः ॥१२॥ कद्रूः क्रोधव
शा प्राधीविनतासुरभिस्तथा । एतास्त्वामभिषिंचन्तु कश्यपस्य प्रियाः स्त्रियः ॥१३॥ पत्नी तु वज्र
पुत्रस्य सुपुत्रा या च नामिनी ॥ समाधया त्वाभिषेकाय विजयाय च पार्थिव ॥१४॥ हथगाश्च पत्नी
च तथा सुप्रसान्तु जयाऽनतथा ॥ सुदर्शनातयोः पुत्रौ विजयं विदधातु ते ॥१५॥ मनोरमा भानुमती ॥

© Dharmartha Trust J&K. Digitized by eGangotri

राज्या
॥८॥

विशालायायावराऽऽदा। अरिष्टनेमिपत्न्यस्त्वामभिषिंचंतु पार्थिव॥१६॥ कृत्तिका रोहिणी देवी इल्व
रुद्रा तिरेवच पुनर्वसुस्तथा पुष्यस्तथाश्लेषा च पार्थिव॥१७॥ मघाश्च फाल्गुनी पूर्वा तथैवोत्तर
फाल्गुनी। हस्तश्चित्रा तथा स्वाती विशाखा च तथा नृप॥१८॥ अनूराधा तथा ज्येष्ठा मूलश्च
वसुधाधिप॥ आषाढा च तथा पूर्वान्या चैवोत्तरा कया॥१९॥ अभिजिच्च तथा श्रुत्या धनिष्ठा
च तथैव च॥ तथा शतभिषक् चैव पूर्वाभाद्रपदा तथा॥२०॥ उत्तरा रेवती राजन्नश्विनी भरणी
तथा। एतास्त्वामभिषिंचंतु सोमपत्न्यः समागताः॥२१॥ मृगी च मृगचर्मा च श्वेता नड्वरा हरि॥
भूता च कपिता दंष्ट्रा सुरसा सुलसा तथा॥२२॥ एता पुलस्त्यपत्न्यस्त्वामभिषिंचंतु पार्थि
व॥ श्येनी भासी तथा क्रौंची धृतराष्ट्री तथा शुकी॥२३॥ पत्न्यस्त्वामभिषिंचंतु अरुणस्यार्क
सारथेः॥ आयतिर्नियतिश्चैव रात्रिर्निद्रा च पार्थिव॥२४॥ एतास्त्वामभिषिंचंतु लोकसंस्थान
हेतवः॥ उमा मेना शची चैव धूमोर्णा निर्ऋतिस्तथा॥२५॥ गौरी शिवा च ऋद्धिश्च वलया चैव नं ॥श्री॥
दन॥ आकृत्या च तथा ज्योत्स्ना या च देवी वनस्पतिः॥२६॥ एतास्त्वामभिषिंचंतु कालस्याव ॥ दं॥
यवाः शुभाः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥२७॥ ग्रहास्त्वामभिषिंचंतु राहुः के

© Dharmartha Trust J&K. Digitized by eGangotri

देवपालाश्चतुर्दश ॥ ३६ ॥ रैवतश्च कुमारश्च तथा वत्सः कुमारकः ॥ वीरभद्रश्च नंदी च विश्वकर्मा पुरोजवः ॥ ३७ ॥
त्रयश्च पार्थिव । स्वायंभुवो मनोः पुत्रो मनुः स्वारोचिषस्तथा ॥ ३८ ॥ औत्तमस्तामसश्चैव रैवतश्चाक्षुष
स्तथा । वैवस्वतोऽथ सावर्णो दक्षब्रह्मसुतावुभौ ॥ ३९ ॥ धर्मपुत्रो रुद्रपुत्रो रौच्यो भौत्यश्च यो
मनुः ॥ एते त्वामभिषिंचंतु मनवश्च चतुर्दश । विश्वभुग्विश्वपाश्चित्रसुशांतः सुमुखी विभु
मनोजवस्तथोऽजस्वी बलिरंकतमांतिको ॥ ४० ॥ वृषश्च कातिधामा च दिवस्पृक्शुचिरेव च । ए
ते त्वामभिषिंचंतु सुरमुख्याः समागताः ॥ ४१ ॥ आत्मा ह्यायुर्मनो दक्षः पंचुः प्राणस्तथैव च
४२ ॥ हविष्मांश्च गविष्ठश्च ऋतः सत्यश्च पार्थिव । अभिषिंचंतु राजंस्त्वां देवा ह्यंगिरसो दश ॥ ४३ ॥ क्र
तुर्दक्षो वसुः सत्यः कालकामो मुनिस्तथा । धृतिमान्मनुजश्चैव रोचमानस्तथैव च ॥ ४४ ॥ एते त्वा
मभिषिंचंतु विश्वेदेवास्तथा दश ॥ अजैकपादहिर्बुध्न्यः पुष्पकेतुस्तथा बुधः ॥ ४५ ॥ भरतश्च
तथा मृत्युः कापालिरथ किंकिणिः ॥ एकादशैते रुद्रास्त्वामभिषिंचंतु पार्थिव ॥ ४६ ॥ भुवनो भावनश्चैव
वसुजन्यः सुजनस्तथा ॥ क्रतुः सुवर्णाविश्विप्रभश्च वसुस्तथा ॥ ४७ ॥ प्रसवश्चाव्ययश्चैव द
क्षश्च मनुजाधिप । एते त्वामभिषिंचंतु भार्गवो नाम देवताः ॥ ४८ ॥ मनो मरुश्च आपश्च नरो यानश्च वी

नर

© Dharmartha Trust J&K. Digitized by eGangotri

राऽस्या
॥८॥
१

यवान्॥ विनिर्दयो नयश्चैव हंसो नारायणस्तथा॥४१॥ विभुश्चैव दिविश्रेष्ठस्तथाऽन्यश्च जगद्धितः॥
एते त्वामासिषिंचंतु साध्या द्वादश पार्थिव॥४२॥ धाता मित्रोऽर्यमा पूषा शक्रोंऽशो वरुणो भगः॥ त्वष्टा
विवस्वान्सविता विष्णुर्द्वादशामः स्मृताः॥४३॥ एते त्वामासिषिंचंतु काश्यपादितिसंभवाः॥ एकज्यो
तिश्च तुर्ज्योतिः पंचज्योतिस्तथैव च॥४४॥ एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः॥ इंद्रश्च
त्यादृश्यं तेततः प्रतिसकृत्तथा॥४५॥ मितश्च संमितश्चैव अमितश्च महाबलः॥ ऋतजित्सत्य
जिच्चैव सुषेणः श्येनजित्तथा॥४६॥ अतिमित्रस्तथामित्रः पुरुमित्रोऽपराजितः॥ ऋतश्च ऋत
वान्धाता विधारणो विधृतो ध्रुवः॥४७॥ विधारणो महातेजा वासवस्य परः सखा॥ ईदृगन्यादृशश्चै
व एतादृगमिताशनः॥४८॥ क्रीडनश्च यथाशक्तिः सरसश्च महायशाः॥ धातुरुग्रो धुनिर्भी
मो अभियुक्तः क्षिपः सहः॥४९॥ द्युतिर्वपुरनाधृष्यो वासः कामो जयो विराट्॥ एते त्वामासिषिं
चंतु मरुतश्च समागताः॥५०॥ देवा एकोनपंचाशन्महाबलपराक्रमाः॥ चित्रांगदश्चित्ररथश्चि
त्रसेनश्च वीर्यवान्॥५१॥ ऊर्णायुरनघश्चैव उग्रसेनश्च वीर्यवान्॥ धृतराष्ट्रश्च सोमश्च सूर्यवर्चास्त ॥श्री॥
॥८॥

© Dharmartha Trust J&K. Digitized by eGangotri

थैवच॥ पराङ्गुराधस्तत्तपः कीर्तिर्दिस्थित्रस्ततथैवच। कलिस्थाप्यं गिरा राजन्पूर्जन्यो नारदस्तथा॥५३॥
वृषपर्वा च हंसश्च तथा चैव हाहा हूहूस्तथा॥ विश्वावसुस्तीम्त्रकश्च तथा वसुरुचिश्च यः॥५४॥ एते त्वा
मभिषिंचंतु गंधर्वाः पृथिवीपते॥ आङ्कृत्यः शोभयंत्यश्च वेगवत्यस्तथैव च॥५५॥ आघुवत्यस्तथै
र्श्च तथा सिकुरयः शुभाः॥ वस्त्रवस्त्राम्रतरुचोत्तु वश्चैव सत्वसत्तया॥५६॥ सीरवः शोभयंत्यश्च
दिव्याश्चाप्सरसां गणाः॥ एतास्त्वामभिषिंचंतु कामिन्यस्तत्क्षणप्रियाः॥५७॥ अनुलमा सुरूपा च सु
केशी च मनोवती॥ मेनका सहजन्या च पर्णीशा पुंजिकस्थला॥५८॥ क्रतुस्थला घृताची च विश्वाची
पूर्वचित्त्यपि॥ प्रम्लोचा चाप्यनुम्लोचा रंभा चैवोर्वशी तथा॥५९॥ पंचचूडा सामवती चित्ररेखा तु पा
र्थिव॥ मिश्रकेशी सुगंधिश्च विद्युत्पर्णा तिलोत्तमा॥६०॥ अद्रिका लक्ष्मणा देना असिनामविका तथा॥
सुभ्रता च सुबाहुश्च सुवोधा सुवपुस्तथा॥६१॥ पुंडरीका सुदाता च सुरथा सुरसा तथा॥ हेमा सरस्व
ती चैव कर्मला सुलता तथा॥६२॥ सुभुजा हंसपादी च वासोली रतिलालसा॥ एतास्त्वामभिषिंचंतु
राजन्नप्सरसः शुभाः॥ ब्रह्मा दक्षो महातेजास्तथा राजन्विरोचनः॥ धन्वी वासस्तथान्ये च दितिपुत्राः स
॥६३॥

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभि
॥२०॥

10

मागताः॥६४॥ असिचिह्नं तु दैत्याश्चादित्येनाथ्यसंसाचयं॥ विप्रचित्तिमुखाः सर्वे दानवास्त्वां समागताः॥
६५॥ असिचिह्नं तु राजानो राज्यं कर्तुं सुसत्वराः॥ हेत्यश्चैव प्रहेत्यश्च सालिलेन्द्रस्तथैव च। सुकेशी पौ
रुषेयश्च यज्ञहा पुरुषादकः॥ विद्युत्स्फूर्यस्तथा व्यासो वधश्च रसनस्तथा॥६७॥ एते त्वामसिचिह्नं
तु समागम्याद्य राक्षसाः॥ सुलिह्वो मणिनन्दश्च सुमनोनंदनस्तथा॥ कंदूतिः पत्रगश्चैव नागोमान्वसु
मांस्तथा॥ सुवर्णनुस्तनः शंखश्चापि पिंगाक्षश्चतुरस्तथा॥६९॥ यमनोनंदरसो नीलः पद्मचंद्रः प्रभा
करः॥ मेघवर्णश्च नंद्यश्च प्रद्योतश्च मदायमाः॥७०॥ स्त्रिनिमान्केतुमांश्चैव मौलिमांश्च चतुर्दशः॥
श्वेतश्च विपुलश्चैव प्रद्युम्नश्च जयावहः॥ पद्मयक्षो बलाकश्च कुमुदश्च बलाहकः॥ पद्मनाभः सु
गंधश्च सुवीरो विजयाकृतिः॥७२॥ पौर्णमासो हिरण्याक्षः शतजिच्चश्च वीर्यवान्॥ एते त्वामसिचिह्नं तु
राजहंसाश्च सत्तमाः॥७३॥ शंखः पद्मश्च राजेन्द्र मकरः कच्छपस्तथा॥ महापद्मश्च नीलश्च खर्वश्च कुं
दो मुकुंदकः॥७४॥ एते त्वामसिचिह्नं तु निधयस्त्वत्समागताः॥ छगलाश्चैकवक्त्रा ये चस्त्रचीनुखान्नपाः॥ श्री॥
७५॥ ऊर्ध्वरोमा विषादश्च ज्वलनो गारकास्तथा॥ कुंभमात्राः स्थूलतुंडाश्च पर्वी राजरक्षकाः॥७६॥ एकर्णाश्च ॥२०॥

© Dharmartha Trust J&K. Digitized by eGangotri

कूष्मांडाश्च तथा ये पात्रपाणयः ॥ मांसप्रियाश्च वेतुंडाश्च निपुणाः स्कंद नामतः ॥ ७७॥ एते त्वामभिषिंचंतु पिशाचानां
तु जातयः ॥ ब्रह्मचर्यस्थिता दांताः सर्वज्ञाः सर्वदर्शिनः ॥ ७८॥ नानाप्रकारवदना नानावाक्शिरोधराः ॥
चतुष्पथपराः ह्यालयस्थस्त्वालयनिकेतनाः ॥ ७९॥ त्रिपुरारिं सर्वदेवं येगता मनुजेश्वर ॥ ते त्वामद्या
भिषिंचंतु गणाः हतपते स्वयं ॥ ८०॥ महाकालपुरस्कृत्य नरसिंहं च मातरः ॥ सर्वास्त्वामभिषिंचंतु रा
जराज्येन नराधिप ॥ यद्धः स्कंदो विशाखश्च नेगमेयस्तथैव च ॥ अभिषिंचंतु राजं स्त्वां सर्वे स्कंदग्रहाः शुभाः ॥ ८१॥
डाकिन्यो याश्च योगिन्यः खेचर्यो भूचरास्तथा ॥ सर्वास्त्वामभिषिंचंतु समेत्य मनुजेश्वर ॥ ८२॥ गरुडश्चा
रुणश्चैव अरुणिश्च महाखगः ॥ संपाती विनतश्चैव विष्णुर्गंधकुमारकः ॥ ८३॥ एते त्वामभिषिंच
तु सुपर्णाः पृथिवीपते ॥ अनंतश्च महानागो वासुकिः शेषतक्षकौ ॥ ८४॥ सुपर्णो दिक्षकुंभश्च वाम
नोथांजनो नमः ॥ ऐरावतो महापद्मः कंबलाश्वतरावुभौ ॥ ८५॥ एलापत्रश्च खंड श्चकर्कोटकधनं
जयौ ॥ महाकर्णो महानीलो धृतराष्ट्रबलाहकौ ॥ ८६॥ कुमारः पुष्पदंतश्च गंधर्वश्च मनस्विकः ॥ न
हुषः खगरोमा च यशांखपालस्तथैव च ॥ ८७॥ पद्मश्च कुलिकश्चैव याणिरित्येवमादयः ॥ नागास्त्वा
मभिषिंचंतु राजराज्येन राधिप ॥ कुमुदैरावतो पद्मः पुष्पदंतोथ वामनः ॥ सुप्रतीकोंजनो नीलः पं

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभि
॥२२॥

त्वां सर्वतो द्विपाः॥ पैतामहास्तथा हंसाहंसः भांकरस्तथा॥ उच्चैःश्रवा हयपतिस्तथा धन्वंतरि
र्नृपौ। कौस्तुभनाथः शंखराजश्च पांतु त्वां सर्वतः सदा॥ चक्रं त्रिशूलं वज्रश्च नंदको ऽस्त्राणि चाप्यथ॥ स
र्वे सिषेकं दत्वा यदिशं तु विजयं कुर्वी॥ धर्मश्च ऋषभाख्यश्च त्वं दानं तपस्तथा॥ यशो यज्ञास्तथैवा
पुर्वलनयं दमः शमश्च॥ एते त्वामभिषिंचंतु चित्रगुप्तश्च पार्थिव॥२४॥ दंडः पिंगलकश्चैव मृत्युः का
लांतकावुभौ॥ वालखिल्यास्तथा सर्वे सर्वे विजयाय ते॥२५॥ दिग्धेनवश्चतस्रस्त्वां सुरभिश्च तथा
नृप॥ अभिषिंचंतु सर्वा निगीर्भिः सार्द्धं नरेश्वर॥२६॥ वेदव्यासश्च वाल्मीकिः श्रमनोयपरामारथ॥
देवलः पर्वतश्चैव दुर्वासा नागुरिः शुचिः॥२७॥ याज्ञवल्क्यः सजावालिर्जमदग्निः शुचिश्रवाः॥ विश्वा
मित्रः स्थूलकक्षोवर्धनो त्रिविडूरथः॥२८॥ एकतश्च द्वितश्चैव त्रितो गौतमगालवौ॥ शांडिल्यश्च भ
रद्वाजो मौद्गल्यो वेदवादिनः॥२९॥ हृदश्वश्च कुटिमंडो जययजानुर्घटोदरः॥ यवक्रीतोथरैभ्यश्च अ
ताध्यामश्च डोमिनिः॥ कराविः सारंगवश्चैव तथाऽगस्त्यो महातपाः॥ उग्रस्तिश्चैव कुडवाञ्जमदीर ॥श्री॥
यः॥३०॥ कात्यायनश्च कण्वश्च बलाकश्चैव नंदनः॥ एते त्वामभिषिंचंतु मुनयः पार्थिवोत्तम॥३१॥ ॥२२॥

© Dharmartha Trust J&K. Digitized by eGangotri

पृथुर्दिलीपो भरतो दुष्यन्तश्च शत्रुजिद्बली ॥ मनुः ककुत्स्थश्चानेना युवनाश्वो जयद्रथः ॥ १०३ ॥ मान्धाता मु-
चुकुन्दश्च तथा राजा पुरूरवाः ॥ इक्ष्वाकुश्च यदुश्चैव नहुषश्च शिबिस्तथा ॥ अम्बरीषश्च नाभागो हरिश्चन्द्रो
महारथः ॥ प्रद्युम्नश्चाथ सुद्युम्नो हरिद्युम्नश्च संजयः ॥ १०५ ॥ एते चान्ये च राजानस्त्वां राजन्दिवंगताः ॥
समायान्त्वभिषेकाय विजयाय तथा श्रियै ॥ १०६ ॥ पर्जन्याद्यास्तथा ह्यष्टौ मेघाः सर्वे समागताः ॥
द्रुमाश्चौषधयो रत्नं बीजानि विविधानि च ॥ सर्वे त्वामभिषिञ्चन्तु राजराज्येषु सत्वराः ॥ पुरुषश्चा-
प्रमेयात्मा महान्तो नियतानि च ॥ १०८ ॥ पृथिवी वायुराकाशमापो ज्योतिस्तथैव च ॥ मनो बुद्धिस्त-
थैवात्मा अव्यक्तश्च महीपते ॥ १०९ ॥ एते त्वामभिषिञ्चन्तु समेता वसुधाधिप ॥ रुक्मभौमः शिला-
भौमः पातालो नीलमृत्तिकः ॥ ११० ॥ पीतरक्तः सिताश्चैव श्वेतभौमास्तथैव च ॥ एते त्वामभिषिञ्चन्तु
विजयाय महीपते ॥ १११ ॥ स्वर्लोकोथ भुवर्लोकश्च लोकोथ महर्जनः ॥ तपः सत्यं च राजेन्द्र वि-
जयाय भवन्तु ते ॥ ११२ ॥ जम्बुः शाकः कुशः क्रौञ्चः शाल्मलिर्द्वीप एव च ॥ लक्षश्च पुष्करश्चैव सर्वे त्वाम-
प्रदिशन्तु ते ॥ ११३ ॥ उत्तराः कुरवः पुण्या रम्या हैरण्वतास्तथा ॥ भद्राश्वः केतुमालश्च वर्षश्चैव इला-

© Dharmartha Trust J&K. Digitized by eGangotri

वृतः ॥११४॥ हरिवर्षः किंपुरुषो वर्षो भारतसंज्ञकः ॥ एते त्वामभिषिंचंतु समेत्य वसुधाधिप ॥११५॥ इंद्रद्वी
पः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गंधर्वो वरुणस्तथा ॥११६॥ अयं च न
वमस्तेषां स्वस्वाम्यं प्रदिशंतु ते ॥ हिमवान् हेमकूटश्च निषधो नील एव च ॥११७॥ श्वेतश्शृंगोऽगवा
केरुर्माल्यवगंधमादनौ ॥ महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतौ ॥ विंध्यश्च पारियात्रश्च सर्व
एव महीधराः ॥ समागम्याभिषिंचंतु त्वामद्य वसुधाधिप ॥११९॥ ऋग्वेदोऽथ यजुर्वेदः सामवे
दस्तथैव च ॥ अथर्ववेदो वेदास्त्वामभिषिंचंतु पार्थिव ॥१२०॥ इतिहासो धनुर्वेदो गांधर्वश्चायु
संज्ञितः ॥ सर्वोपवेदाश्च तथा विजयाय भवंतु ते ॥१२१॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्यो
तिषां गतिः ॥ छंदो विचितिषष्ठानि विजयाय भवंतु ते ॥१२२॥ अंगानि वेदाश्चत्वारो मीमांसान्या
यविस्तरः ॥ धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥१२३॥ सांख्ययोगः पांचरात्रो वेदः पाशु
पतस्तथा ॥ कृतांतपंचकं चैव शास्त्राणि विविधानि च ॥१२४॥ गायत्री पापशमनी गंगा देवी म ॥श्रीः॥
हाशिवा ॥ गांधारी च तथा चान्या विजयं प्रदिशंतु ते ॥१२५॥ देवदानवगांधर्वा यक्षराक्षसपन्नगाः ॥ ॥१२॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऋषयो मनवो गावो देवमातर एव च ॥२२६॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्रा
णि सर्वशास्त्राणि राजानो वाहनानि च ॥२२७॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ स्थाना
नि च समस्तानि पुण्यान्यायतनानि च ॥२२८॥ जीमूतानि च सर्वाणि तद्विकाराश्च सर्वशः ॥ उक्तानि
चाप्यनुक्तानि विजयाय सर्वं तु ते ॥२२९॥ लवणक्षीरतोयाश्च घृतमंडोदकास्तथा ॥ दधिमंडोदकाश्चै
व सुरोदश्च नराधिप ॥२३०॥ तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः ॥ गर्भोदकश्च तोयैस्त्वामभि
षिंचंतु पार्थिव ॥२३१॥ चत्वारः सागराश्चैव स्वैस्तोयेन पार्थिव ॥ समागम्याभिषेके तु विजयं प्रदि
शंतु ते ॥२३२॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषं तथा ॥ तथा ब्रह्मसरः पुण्यं गयाशीर्षं तथैव
च ॥२३३॥ कालोदको नंदिकुंडस्तथैवोत्तरमानसः ॥ स्वर्गमार्गप्रदश्चैव तथा पंचनदः शुभः ॥ भृगुती
र्थं प्रभासश्च तथैवामरकंटकः ॥ आश्रमः कालिकायाश्च नृपाविंदोस्तथाश्रमः ॥२३४॥ गो
तीर्थं याग्नितीर्थं च विमलः स्वर्ग एव च ॥ देवमार्गश्च विमलः पुण्यस्तंडुलिकाश्रमः ॥२३५॥ कपि
लश्च तथा तीर्थं स्तीर्थौ वातिकखंडिको ॥ महासरस्तथा गरुत्पकुमारी तीर्थमेव च ॥२३६॥ गंगा
द्वारः कुशावर्त्तो बिल्वको नीलपर्वतः ॥ वाराहः पर्वतश्चैव तीर्थं कनखलं तथा ॥२३७॥ सुगंधाश

© Dharmartha Trust J&K. Digitized by eGangotri

मज्यासि
॥२३॥

वराकुंभास्तथा शाकंभरी निपा ॥ भृगुतुंगः सकुब्जाम्रः कपिलस्य तथाश्रमः ॥१३९॥ चमसो
द्भेदनः पुण्यस्तथा विनशनं शुभं ॥ अजवेगस्य मेधाख्यं त्र्यग्रंधस्य पार्थिव ॥१४०॥ कालंजरः
सकेदारो रुद्रकोटिस्तथैव च ॥ महालयश्च राजेन्द्र वदर्याश्रम एव च ॥१४१॥ नंदा च सोमतीर्थं च
सूर्यतीर्थं शतक्रतोः ॥ अश्विनोर्वरुणस्याथ वायो वैश्रवणस्य तु ॥१४२॥ ब्रह्मणश्चैव मार्यस्य
यमस्य च्यवनस्य च ॥ विरूपाक्षस्य धर्मस्य तथा चाप्सरसां नृप ॥१४३॥ ऋषीणां च वसूनां
च साध्यानां मरुतां तथा ॥ आदित्यानां च रुद्राणां तथा चांगिरसां नृप ॥१४४॥ विश्वदेवग्र
गणां च तथान्येषां च मानद ॥ कर्दमस्य गणेशस्य चैव वसुपुत्रा च नराधिप ॥१४५॥ शालग्राम
सरश्चैव वाराहो मानसस्तथा ॥ कामाश्रमास्त्रिकूटस्य चित्रकूटस्तथैव च ॥१४६॥ सपूर्वः क्रतुसा
रश्च तथा विष्णुपदं सरः ॥ कापिलं च तथा तीर्थं वासुकेस्तीर्थमेव च ॥१४७॥ सिंधूत्तमस्य पावनो
पथस्सर्या रक्तकुंभकः ॥ पुंडरीकश्च राजेन्द्र गंगासागरसंगमः ॥१४८॥ सिंधुसागरयोश्चैव संगमः ॥ अः
सुधाकुंभाव सुदश्च मानसं च तथा सरः ॥१४९॥ तथा विंदुसरः पुण्यं सरस्त्वच्छोदकं तथा ॥ धर्मार ॥२३
मनोहरः ॥ त

© Dharmartha Trust J&K. Digitized by eGangotri

एवं फल्गुतीर्थं मनिस्तुक्तं तथैव च ॥१५०॥ नैमित्यस्य तथा पुण्यो बदरीपावनः शिवः ॥ तीर्थं सप्तऋषी
णां तु वाह्निकतीर्थं तु पार्थिव ॥१५१॥ पुण्यवस्त्रापथो नित्यं गलेशास्कपार्थिव ॥ पुष्पन्यासस्त
थाचैव तीर्थं हंसपदस्तथा ॥१५२॥ अस्मृतीर्थं कर्णश्रोमाणिमन्थस्तथैव च ॥ देविकाद्रून्
गश्च स्वर्गविन्दुस्तथैव च ॥१५३॥ आरण्यकस्तथा तीर्थं तीर्थश्चैरावतस्तथा ॥ ऐरावती समुद्रे
द्वीर्थं सोमग्रथाः पदं ॥१५४॥ करवीराद्रयं चैव नागस्तोयणिकस्तथा ॥ पापमोचनकश्चैव गो
णमोचनकस्तथा ॥१५५॥ तडेडनस्तथा पुण्यः संपूज्यः सरसांवरः ॥ देवब्रह्मसरः पुण्यं सार्धं
दीर्घितु पार्थिव ॥१५६॥ एते चान्ये च बहवः पुण्यसंकीर्तनाः शुभाः ॥ तोयैस्त्वामभिषिंचंतु सर्व
पातकनाशनैः ॥१५७॥ गंगा महानदी पुण्या ह्रादिनी ह्लादिनी तथा ॥ पावनी च तथा सीता च
क्षुः सिंधुश्च नर्मदा ॥१५८॥ सुप्रभा कांचनाक्षी च विशाला मानसी ह्रदा ॥ सरस्वत्योघनोद
वस्तुवेषा विमलोदका ॥१५९॥ शिप्रा शोणश्च तद्वच्च शारपुण्डिका तथा ॥ अच्छोदा च विपाशा
च चंद्रभागा इरावती ॥१६०॥ वितस्ता देविका रंसा केशा देवह्रदा शिवा ॥ तथा वेत्रुमती पुण्या

© Dharmartha Trust J&K. Digitized by eGangotri

।रा॰ध्यासि ॥२४॥ कौशिकीयमुनातथा॥१६१॥गोमतीधूतपापा च बाहुदा तु सरस्वती॥ निर्विंध्याचतनीयाचलो
हितश्च महानदः॥१६२॥ वेदस्मृतिर्वेदमाता वेदघुर्घुरदा तथा॥ पर्णाशा वदना चैव सदानी
राकुमुद्वती॥१६३॥ पीता चर्मण्वती धूमा विदर्भा वेणुमत्यपि॥ अवंती च तथा कुंती सुरसा च पला
शिनी॥१६४॥ मंदाकिनी दशार्णा च सिंधुरेवा कुमुद्वती॥ तपनी पिप्पला श्येनी करतोया
पिशाचिका॥१६५॥ चित्रोपला चित्रवर्णा मंजुला वाकुला मती॥ शुक्तिमती सिनीवाली मंडूकी
र पिताकरः॥१६६॥ तापी पयोष्णी निर्विंध्या सिना च निषधावती॥ वेणा वैतरणी भीमा मंदरा
च तथा कृष्णः॥१६७॥ तोया चैव महागौरी दुर्गती पिंगला तथा॥ गोदावरी भीमरथी कृष्णवेणा
भयंकरा॥१६८॥ तुंगभद्रा सुप्रयोगा वाह्या कावेरि रेवका॥ कृतमाला ताम्रपर्णी पुष्पजा उत्पल
वती॥ नंदसमा ऋषिकुल्या वंशस्तुका त्रिदिवालया॥ लांगूलिनी वंशधरी जंबू स्वसुकलावती॥ ॥श्रीग
॥१७०॥ ऋषिकावरवेगा च मंदगा मंदवाहिनी॥ दमा देवी दया व्योमा पयोष्णी कालवाहिनी॥ कं ॥२४
पना च विशाला च करतोया सुवाहिनी॥ ताम्रारुणा वेत्रवती सुजा चाप्यवन्त्यपि॥१७१॥ श्रीइक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

राज्याभि
।१५।

दूरमाचैवसुप्रकाराद्धिरण्मयी॥ आपगालोपरानाम्नीसंख्यातुवडवानदी॥ तथामहेंद्रवाणीश्रावणा
वनमालिकावलयावती॥ नीलोद्भूतकराचैवपार्जुनीवनवासिनी॥१७४॥ आनंदाचापरानंदावसुनी
दासुवासिनी॥ एतास्त्वामप्सराडेंद्रनद्यस्त्वांविविधोदकाः॥१७५॥ सर्वपापप्रशमनाःसर्वलोक
मातरः॥ स्वतोयपूर्णैःकलशैरभिषिंचंतुपार्थिव॥१७६॥ एतेपर्वतश्रेष्ठानृपराज्याराज्येदशाभिषेक
पृथिवींसमग्रां॥ समागतास्तुदत्वाचिरंवजीवधर्मैवतेवुद्धिरनीवचारस्क॥१७७॥ साध्यास्त्वामभि
षिंचंतुवसवस्तेजसेश्रियै॥ याम्याथामरुतोभिषिंचंतुत्वांरुद्राविजयायच॥ आदित्यास्त्वाभि
षिंचंतुप्रतीच्यांदिशिवृद्धये॥ विश्वेदेवास्तथोदीच्यामभिषिंचंतुतुष्टये॥ दिगीशास्त्वाभिषिंचंतुता
सदाविजयायच॥ साम्राज्यमितिमंत्रेणराजानमभिषेचयेत्॥ ॥इतिश्रीमज्जामेश्वरसू ॥श्रीः॥
सूनुमाधवसद्धामसम्राट्स्थपतिरघुनाथवाजपेयिविरचितोराज्याभिषेकप्रयोगः॥ ॥१५॥
श्रीमद्दीक्षितरंगनाथतनयःश्रीभट्टनारायणाभिनीतिप्रथितोऽविमुक्तनगरेश्रीवालकृष्णाजज्ञे॥
धराकेशीतकरांकरूपतिमितेव्दे१६ माघेसितेभातिथौशीवाख्यनगरेऽमरद्विजितिभुजोराज्येऽलिखत्पुस्तकम्॥

ष॥

© Dharmartha Trust J&K. Digitized by eGangotri

४६३३

ग्रं' +

[illegible]रेवहक्विभाजे[illegible]

पुस्तकमिदं [illegible] पाठकस्य

[illegible]पं[illegible]

३००

15

४६३३

© Dharmartha Trust J&K. Digitized by eGangotri